नवमः पाठः

5KZ7N2

# व्यवसायेषु संस्कृतम्

संस्कृतज्ञाः गणकरूपेण चिकित्सकरूपेण च लोकहिते रताः सन्ति। कर्मकाण्डनिष्णाताः याज्ञिकाः अपि हव्यरूपेण ओषधिवनस्पतीनां वायुरूपेण परिवर्तनं कृत्वा मेघरचनायां साधकाः भवन्ति। मेघैः वृष्टिपातः भवति। वृष्टिपातेन अन्नानि भवन्ति। तैः प्राणिनां पोषणंभवति।

**गणकः**



ज्योतिषं वेदानां नेत्रं वर्णितमस्ति। तस्य विद्वान् गणकः कथ्यते। सः ग्रहनक्षत्राणाम् अध्ययनं करोति। सः ग्रहाणां जनेषु प्रभावस्यापि विचारं करोति। हिन्दुजनानां प्रत्येकं नामकरणादि-संस्कारं कर्तुं तथा नवीनकार्यस्य प्रारम्भाय सः शुभाशुभं मुहूर्तं निर्दिशति। अतः सः विनीतवेशः सत्यवक्ता शुचिः देशकालतः भवेत्। एवंविधं बहुज्ञं दैवज्ञं जनाः सम्मानयन्ति।

**चिकित्सकः**



ऋग्वेदादयः चत्वारः वेदाः सन्ति। आयुर्वेदादयः तेषाम् उपवेदाः भवन्ति। आयुर्वेदस्य विद्वान् चिकित्सकः भवति। सः औषधविधाने तेषां प्रयोगे च निपुणः भवति। योगतन्त्र-शल्य-शालक्यादि-प्रयोगेण सः प्राणिनां हितं साधयति। भारतीय-विद्यायां नराणामिव गजाश्वादिपशूनां वृक्षादीनामपि रोगशमनाय विचारः वर्णितः अस्ति। धन्वन्तरिः

अश्विनौ, आत्रेयः, चरकः, सुश्रुतः त्र्यम्बकशास्त्री, सत्यनारायण शास्त्री अन्ये च चिकित्सकाः श्रेष्ठाः आसन्। ते शारीरिक-मानसिक-रोगहरणे समर्थाः अभवन्। एवम् अन्येऽपि अनेके व्यवसायाः सन्ति यत्र संस्कृतभाषायाः संस्कृतज्ञाना×च महती उपयोगिता अस्ति।

**शब्दार्थ**

गणकरूपेण = ज्योतिषी के रूप में। लोकहिते = समाज के कल्याण में। कर्मकाण्डनिष्णाताः = कर्मकाण्ड में पारंगत। याज्ञिकाः = यज्ञ करने वाले। ओषधिवनस्पतीनां = वह वनस्पति जिससे

**अभ्यास**

औषधि का निर्माण होता है। विनीतवेशः = विनम्रता व्यक्त करने वाले वेश से युक्त। चत्वारः वेदाः = चार वेद-ऋक्, यजुः, साम, अथर्व। औषधविधाने = दवा का निर्माण करने में। निपुणः = कुशल। रोगशमनाय = रोग के शमन (शान्ति) के लिए।

1. उच्चारण करें-

संस्कृतज्ञाः कर्मकाण्डनिष्णाताः ओषधिवनस्पतीनाम्

गजाश्वादिपशूनाम् वृक्षादीनामपि संस्कृतज्ञाना×च

2. एक पद में उत्तर दें-

(क) वेदानां नेत्रं किमस्ति ? (ख) वेदाः कति सन्ति ?

(ग) गणकः कीदृशो भवेत् ? (घ) कम् उपवेदं ज्ञात्वा जनः चिकित्सकः भवति?

3. म×जूषा से उचित पदों को चुनकर रिक्त-स्थानों की पूर्ति करें-

उपयोगिता, चिकित्सक, याज्ञिकाः, नेत्रम्। ।

(क) ...................यज्ञे हव्यरूपेण आहुति-द्वारा मेघान् उत्पादयन्ति।

(ख) ज्योतिषं वेदानां ..............................वर्णितमस्ति।

(ग) बहुषु व्यवसायेषु संस्कृतज्ञानां महती ..........................अस्ति।

(घ) आयुर्वेदस्य विद्वान् ..........................................भवति।

4. निम्नलिखित वाक्यों का संस्कृत में अनुवाद करें -

(क) आयुर्वेद एक उपवेद है।

(ख) ज्योतिष-शास्त्र से ग्रह नक्षत्रों के प्रभाव का ज्ञान होता है।

(ग) चिकित्सक को विनीत और कुशल होना चाहिए।

(घ) चिकित्सक व्याधियों को दूर करता है।

5. नीचे दिए गए पदों से संस्कृत वाक्य बनाएँ-

मेघैः, कन्दुकेन, पुष्पेण, वायुयानेन, जलयानेन, जलेन।

**शिक्षण संकेत-**

1. विविध संस्कारों में, शुभ कार्यो में, कालगणना एवं चिकित्सा के क्षेत्र में संस्कृत ज्ञान के महत्त्व पर प्रकाश डालें।

2. भारतीय मासों एवं तिथियों के नामों की जानकारी कराएँ।

## परिशिष्टम

### सन्धि-विचार तथा रूप

### व्यंजन-सन्धि

वाक् + जालः = वाग्जालः
जगत् + ईश्वरः = जगदीश्वरः
अच् + अन्तः = अजन्तः
षट् + दर्शनम् = षड्दर्शनम्

1. यदि किसी वर्ग के प्रथम अक्षर क्,च्,ट्,त्,प् के बाद उसी वर्ग का तीसरा अर्थात् ग्,ज्,ड्,द्,ब् या चैथा अक्षर अर्थात् घ्,झ्,ढ्,ध्,भ् या अन्तस्थ अर्थात् य्,व्,र्,ल् अथवा कोई स्वर आये तो वर्ग के उस प्रथम अक्षर के स्थान पर उसी वर्ग का तीसरा अक्षर हो जाता है।

2. इसी प्रकार किसी वर्ग के प्रथम अक्षर के बाद किसी वर्ग का पाँचवाँ अक्षर ङ्,ञ्,ण्,न्,म्, आये तो प्रथम अक्षर के स्थान पर उसी वर्ग का पाँचवाँ अक्षर हो जाता है, जैसे-

प्राक् + मुखः = प्राङ्मुखः
जगत् + नाथः + जगन्नाथः
उत् + गमः = उद्गमः
उत् + भवः = उद्भवः
षट् + मासः = षण्मासः

सत् + आनन्दः त्= सदानन्दः

उक्त प्रयोगों से यह स्पष्ट होता है कि यदि त् के बाद कोई स्वर अथवा ग्,घ्,द्,ध्,ब्,भ् तथा य्,व्,र्,ल्, आये तो त् के स्थान पर द् हो जाता है। इनके कुछ अपवाद भी हंै, जो इस प्रकार है, यथा त् के बाद ज् आने पर त् का ज् और ल् आने पर त् का ल् हो जाता है, जैसे-

सत् + जनः = सज्जनः
तत् + लीनः = तल्लीनः

**विसर्ग-सन्धि**

जब पहले शब्द के अन्त मंे विसर्ग हो और बाद में आने वाले शब्द की प्रथम ध्वनि स्वर या व्य×जन हो तो ऐसी स्थिति में जो परिवर्तन होता है, उसे विसर्ग-सन्धि कहते हैं, जैसे-

निः + मलः = निर् + मलः = निर्मलः

निः + आहारः = निर् + आहारः = निराहारः

हरिः + चन्द्रः = हरिस् + चन्द्रः = हरिश्चन्द्रः

निः + सन्देहः = निस् + सन्देहः = निस्सन्देहः

ऊपर लिखे हुए उदाहरणों से यह ज्ञात होता है कि -

(क) यदि विसर्ग के पहले इ हो और बाद मंे वर्ग का पाँचवाँ वर्ण हो तो विसर्ग के स्थान पर र् हो जाता है।

(ख) यदि विसर्ग के पूर्व इ हो और विसर्ग के बाद आ आया हो तो विसर्ग के स्थान पर र् हो जाता है।

(ग) यदि विसर्ग के पहले इ हो और बाद में च् अथवा तालु-स्थानीय कोई वर्ण आया हो तो विसर्ग के स्थान पर श् हो जाता है।

(घ) यदि विसर्ग के पहले इ हो और बाद में क् अथवा प वर्ग का कोई वर्ण हो तो विसर्ग के स्थान पर ष् हो जाता है।

**शब्दरूप**

**इकारान्त पुंल्लिङ्ग शब्द**

मुनि

मुनिः मुनी मुनयः

मुनिम् मुनी मुनीन्

मुनिना मुनिभ्याम् मुनिभिः

मुनये मुनिभ्याम् मुनिभ्यः

मुनेः मुनिभ्याम् मुनिभ्यः

मुनेः मुन्योः मुनीनाम्

मुनौ मुन्योः मुनिषु

हे मुने ! हे मुनी ! हे मुनयः!

**हरि, ऋषि, कवि, रवि आदि के रूप भी इसी प्रकार चलते हैं।**

**तकारान्त स्त्रीलिङ्ग ृब्द**

**सरित्- नदी**

**एकवचन द्विवचन बहुवचन**

सरित् सरितौ सरितः

सरितम् सरितौ सरितः

सरिता सरिद्भ्याम् सरिद्भिः

सरिते सरिद्भ्याम् सरिद्भ्यः

सरितः सरिद्भ्याम् सरिद्भ्यः

सरितः सरितोः सरिताम्

सरिति सरितोः सरित्सु

हे सरित् ! हे सरितौ ! हे सरितः !

**उकारान्त स्त्रीलिङ्ग ृब्द**

**धेनु-गाय**

धेनुः धेनू धेनवः

धेनुम् धेनू धेनूः

धेन्वा धेनुभ्याम् धेनुभिः

धेनवे/धेन्वै धेनुभ्याम् धेनुभ्यः

धेन्वाः धेनुभ्याम् धेनुभ्यः

धेन्वाः धेन्वोः धेनूनाम्

धेन्वाम् धेन्वोः धेनुषु

हे धेनो ! हे धेनू ! हे धेनवः!

**धातुरूप**

**परस्मैपदी धातु**

दृश् (पश्य्)-देखना

**लट्लकार (वर्तमानकाल)**

पश्यति पश्यतः पश्यन्ति

पश्यसि पश्यथः पश्यथ

पश्यामि पश्यावः पश्यामः

**लोट्लकार (आज्ञा/प्रार्थना)**

पश्यतु पश्यताम् पश्यन्तु

पश्य पश्यतम् पश्यत

पश्यानि पश्याव पश्याम

**लङ्लकार (भूतकाल)**

अपश्यत् अपश्यताम् अपश्यन्

अपश्यः अपश्यतम् अपश्यत

अपश्यम् अपश्याव अपश्याम

**विधिलिङ्लकार (विधि/सम्भावना)**

पश्येत् पश्येताम् पश्येयुः

पश्येः पश्येतम् पश्येत

पश्येयम् पश्येव पश्येम

**लृट्लकार (भविष्यत्काल)**

द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति

द्रक्ष्यसि द्रक्ष्यथः द्रक्ष्यथ

द्रक्ष्यामि द्रक्ष्यावः द्रक्ष्यामः

**स्था (तिष्ठ्) ठहरना**

**लट्लकार (वर्तमानकाल)**

तिष्ठति तिष्ठतः तिष्ठन्ति

तिष्ठसि तिष्ठथः तिष्ठथ

तिष्ठामि तिष्ठावः तिष्ठामः

**लोट्लकार (आज्ञा/प्रार्थना)**

तिष्ठतु तिष्ठताम् तिष्ठन्तु

तिष्ठ तिष्ठतम् तिष्ठत

तिष्ठानि तिष्ठाव तिष्ठाम

**लङ्लकार (भूतकाल)**

अतिष्ठत् अतिष्ठताम् अतिष्ठन्

अतिष्ठः अतिष्ठतम् अतिष्ठत

अतिष्ठम् अतिष्ठाव अतिष्ठाम

**विधिलिङ्लकार (विधि/सम्भावना)**

तिष्ठेत् तिष्ठेताम् तिष्ठेयुः

तिष्ठेः तिष्ठेतम् तिष्ठेत

तिष्ठेयम् तिष्ठेव तिष्ठेम

**लृट्लकार (भविष्यत्काल)**

स्थास्यति स्थास्यतः स्थास्यन्ति

स्थास्यसि स्थास्यथः स्थास्यथ

स्थास्यामि स्थास्यावः स्थास्यामः

**पा (पिब्) पीना**

विशेष - ‘पा’ को लट्, लोट्, लङ् और विधिलिङ् में ‘पिब्’ आदेश हो जाता है।

**लट्लकार (वर्तमानकाल)**

पिबति पिबतः पिबन्ति

पिबसि पिबथः पिबथ

पिबामि पिबावः पिबामः

**लोट्लकार (आज्ञा/प्रार्थना)**

पिबतु (पिबतात्) पिबताम् पिबन्तु

पिब (पिबतात्) पिबतम् पिबत

पिबानि पिबाव पिबाम

**विधिलिङ्लकार (विधि/सम्भावना)**

पिबेत् पिबेताम् पिबेयुः

पिबेः पिबेतम् पिबेत

पिबेयम् पिबेव पिबेम

**लङ्लकार (भूतकाल)**

अपिबत् अपिबताम् अपिबन्

अपिबः अपिबतम् अपिबत

अपिबम् अपिबाव अपिबाम

**लृट्लकार (भविष्यत्काल)**

पास्यति पास्यतः पास्यन्ति

पास्यसि पास्यथः पास्यथ

पास्यामि पास्यावः पास्यामः

**नी (नय्) ले जाना**

**लट्लकार (वर्तमान काल)**

नयति नयतः नयन्ति

नयसि नयथः नयथ

नयामि नयावः नयामः

**लोट्लकार (आज्ञा/प्रार्थना)**

नयतु नयताम् नयन्तु

नय नयतम् नयत

नयानि नयाव नयाम

**लङ्लकार (भूतकाल)**

अनयत् अनयताम् अनयन्

अनयः अनयतम् अनयत

अनयम् अनयाव अनयाम

**विधिलिङ्लकार (विधि/सम्भावना)**

नयेत् नयेताम् नयेयुः

नयेः नयेतम् नयेत

नयेयम् नयेव नयेम

**लृट्लकार (भविष्यत्काल)**

नेष्यति नेष्यतः नेष्यन्ति

नेष्यसि नेष्यथः नेष्यथ

नेष्यामि नेष्यावः नेष्यामः

**कृ धातु (करना)**

**लट्लकार (वर्तमान काल)**

करोति कुरुतः कुर्वन्ति

करोषि कुरुथः कुरुथ

करोमि कुर्वः कुर्मः

**लोट्लकार (आज्ञा/प्रार्थना)**

करोतु/कुरुतात् कुरुताम् कुर्वन्तु

कुरु/कुरुतात् कुरुतम् कुरुत

करवाणि करवाव करवाम

**विधिलिङ्लकार (विधि/सम्भावना)**

कुर्यात् कुर्याताम् कुर्युः

कुर्याः कुर्यातम् कुर्यात

कुर्याम् कुर्याव कुर्याम

**लङ्लकार (भूतकाल)**

अकरोत् अकुरुताम् अकुर्वन्

अकरोः अकुरुतम् अकुरुत

अकरवम् अकुर्व अकुर्म

**लृट्लकार (भविष्यत्कालं)**

करिष्यति करिष्यतः करिष्यन्ति

करिष्यसि करिष्यथः करिष्यथ

करिष्यामि करिष्यावः करिष्यामः